संस्कृत

ग्रं.नं ३०

स्तोत्र-

विष्णु सहस्त्रनाम-

भाष्य

६९८/स्तो. ६ ३५४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

1

श्रीगणेशायनमः ॥ श्रीएकवीराभार्गवरामाभ्यांनमः ॥ श्रीगुरवेनमः ॥ श्रीकृष्णायनमः ॥
पणमामिहरिपदाइंकिलपढमंबह्मणुदपालिच्चिताइं ॥ जाकतोसंभूतागंगाजाएस्कला
हिदाषकुंभदा ॥१॥ अस्याश्छायायथा ॥ प्रणमामिहरिपदेकिलप्रथमंब्रह्मणानुतपरिचि
य ता ॥ याभ्यांसंभूतागंगायाःस्कलारितापकुंभता ॥१॥ स्कंधकमिदं ॥ नमःश्रीशंकरा
नंदगुरुपादांबुजन्मने ॥ सविलासमहामोहग्राहग्रासैककर्मणे ॥२॥ यस्यस्मरणमा
त्रेणजन्मसंसारबंधनात् ॥ विमुच्यतेनमस्तस्मै विष्णवेप्रभविष्णवे ॥३॥ रमेशेनःपा
र यात्क्षणमतरयेशंजगदिदंरमेशेनत्रातंनमरमेशायमहते ॥ रमेशान्नास्त्यन्यत् त्रिजग
तिरमेशस्यमहिमारमेशेनाश्रित्तानिवसगुरमेशत्वमवमां ॥४॥ गुरुरेवगतिर्गुरुमेवभ
जेगुरुणैवसहास्मिनमोगुरवे ॥ नगुरोरधिकंशिशुरस्मिगुरोर्मतिरस्तुगुरोममपाहिगु
रो ॥५॥ भास्करस्य ॥ यःसर्वजगतांकर्ताभर्त्ताहर्त्तास्वयंप्रभुः ॥ सच्चिदानंदरूपःस दि
श्यात्शंशंकरःसदा ॥६॥ भाष्यश्रीशंकरीयंविलसतिविमलंकावित्धुनाम्नांसहस्त्रे

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वि॰स॰ लोके व्याख्याप्रवाहैः स्वमतततिभिरिवाघैः परः कल्पवृक्षः ॥ पुष्पाण्यान्वीय तस्मा
द्विरचितममलं दामसूक्ष्मार्थसूत्रे तेन श्रीकांतविठ्ठोऽप्रविठ्ठसतु सदा स्कंधराकं
(1) धराले ॥७॥ कुल्यायां नरनाम्नि सा विहरणे त्यक्त्वा पिपासुर्बलः सोऽहं विष्णुसहस्र
नामजलधौ कर्तुं प्रवेशायते ॥ हृष्येद्देवमनःसरोहंसं दृष्ट्वा तरं वक्ष्यामि निःकल्मषाऽार
व्यंशाशकेन दुःसहतरं शार्दूलविक्रीडितं ॥८॥ देवदेवेशशंभोः पालयाशु द्विजेभो
द्विजेशप्रभो रक्षणीयोऽस्मि ते ॥ याऽ…तनिर्मी लयं तां प्रापिता देहितां तातया
प्राग्विर्णायं तनुः ॥९॥ जयश्रीकांत प्रभुवररमानाथ सदयत्रयीनाथस्वामिन्नृपदु
कुलजलेश द्विजपते ॥ विभो मह्यं यच्छानवरतमिदं विठ्ठलगुरो तवांघ्र्याः सानि
ध्यात्द्ववतु मम भक्तिः शिखरिण्या ॥१०॥ विभो पाहि मां त्वं कृपालो सदर्हत्वयारक्ष
णीयोऽस्म्यहं त्वां प्रपन्नः ॥ त्वया नाथ बंधो प्रभो नाथ लोकं भुजंगप्रयातं तथा मेऽस्ति
वृत्तं ॥११॥ एकैकनामगां व्याख्यां भगवद्भाष्यसंमितां ॥ श्लोकार्धैः संग्रहिष्यामि पद्यैः

1A

पंचशतीमिते: ॥२२॥ श्रीगुरुचरणानां ॥ अर्थतः शब्दतश्चात्र पौनरुक्त्यं न दुष्यति ॥ अध्या
हारो यत्तदादिशब्दानां क्वचित्तथा ॥२३॥ अव्ययैः क्वचित्पूर्तिः कारणात्तान्मया कृता ॥
तथैवात्र परेशादिशब्दानामनुशासनं ॥२४॥ संग्रहीतोर्थ एकोत्र द्वितीयोपि क्वचित्क्वचित् ॥
सविशेषणनामानि लिखितानि तथा तथा ॥२५॥ अश्रुधोक्तिर्न दोषाय श्रुत्योक्ति निर्गुण
रूपमे ॥ बालकोक्तिरिति प्रीत्यानुष्ठातां जगतः पिता ॥२६॥ शतकादिभूतनामानि ॥
विश्वं वृषाकपिः संधाता युगावर्त्तो वार ॥ कपींद्रः श्रीवत्सवक्षाः सत्वाक्षोभ्यश्च स्वास्ति
दः ॥२७॥ शतकांतनामानि ॥ अच्युतासिंह्युगादिकृदनयोभोक्ता तथान्वृशीवः ॥ सत्कृ
तिस्कवर्णबिंदुव्ययसर्वप्रहरणायुधाश्चेति ॥२८॥ वीरक इत्यत्र छंदोनुरोधेन स्वार्थेक
प्रत्ययः ॥ कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतं ॥ वेदांतभास्करं वंदे शमादिनिलयं मुनि
मिति ॥२९॥ श्रीः ३०॥ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो भू
तात्मा भूतभावनः ॥१॥ अथ कारिकाबोल्लिप्रारंभः ॥ विश्रांति सर्वभूतानि प्रोतो विश्वं स ईरितः

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वि॰स॰

वेवेष्टि सर्वान्नियोल्लोकान्स विष्णुर्व्यापकत्वतः ॥ १ ॥ वषट्कारोध्वरे यस्योद्देशे नोक्ता वषट्क्रिया

ईट् भूतभव्यभवतां भूतभव्यभवत्प्रभुः ॥ २ ॥ चरांश्चराणि भूतानि कुरुते भूतकृत्ततः

(२) सर्वाणीमानि भूतानि स्वयं पुष्णाति भूतभृत् ॥ ३ ॥ प्रपंचरूपेण मुहुर्भवन्भावः प्रकीर्तितः

यः सर्वभूतान्तर्यामी भूतात्मा कथितो हि सः ॥ ४ ॥ भूतान्युत्पादयति यः स स्मृतो भूतभावनः

पूतो नद्योदयस्यात्मा पूतात्मा निर्गुणश्च [illegible] ॥ ५ ॥ परमात्मा स वै कार्यकारणाभ्यां विलक्षणः

मुक्तानां प्राप्तिरुत्कृष्टा मुक्तानां परमा[illegible] ॥ ६ ॥ विनाशो यस्य नास्त्येव कदाचिदपि सोव्ययः

पुरं शरीरं तस्मिन्यः शेते स पुरुषः स्मृतः ॥ ७ ॥ पश्यत्यव्यवधानेन सर्वसाक्षी ततस्मृतः २

क्षेत्रं शरीरं जानाति क्षेत्रज्ञस्तत्प्रकाशकः ॥ ८ ॥ नाविनश्यत्येव तस्मादक्षरः कथितो हि सः

वय जीवेश्वरैकविज्ञानं योगस्तद्रूप एष हि ॥ ९ ॥ स्मृतो योगविदां नेता योगिनामपि नायकः

यो मायाजीवयोरीशः प्रधानपुरुषेश्वरः ॥ १० ॥ नरस्यापि सिंहस्य वपुर्नरसिंहवपुस्ततः ॥

श्रीमान्वक्षःस्थले यस्य नित्यं प्राप्नोति वसत्यसौ ॥ ११ ॥ अभिरूपा यस्य केशाः केशवो या त्रिमूर्तिमान् ॥

...Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

पुरुषापुरुषाणांवोत्तमत्वात्पुरुषोत्तमः ॥ १२ ॥ ज्ञातृत्वात्सर्वजगतोहेतुत्वात्सर्वमुच्यते ॥
(2A) हिनस्तिसकलान्लोकान्संहारेशर्वईरितः ॥ १३ ॥ नैस्त्रैगुण्यतयाशुद्धः सदानंदमयःशिवः
सदाचांचल्यराहित्याद्दयंस्थाणुरितिस्मृतः ॥ १४ ॥ भूतानांकारणत्वेन स्थितोभूतादिरुच्यते
अनश्वरत्वंलयस्थानंकल्पांतेसोव्ययोनिधिः ॥ १५ ॥ स्वेच्छयाभवनंयस्यसमीचीनंससंभव ॥
फलानिसर्वभोक्तॄणांसंवादयतिभावनस्ततः ॥ १६ ॥ प्रपंचभरणाद्भर्तासोधिष्ठानतयास्मृतः
यस्मादिमानिभूतानिजायंतेप्रभवस्ततः ॥ १७ ॥ सामर्थ्यातिशयःसर्वक्रियासुयस्यततःप्रभुः
निरुपाधिकमैश्वर्यंयस्यासावीश्वरःस्मृतः ॥ १८ ॥ स्वतंत्रभवनाल्लोकेस्वयंभूःपरिकीर्तितः
शंभक्तानांभावयतियःसशंभुःप्रकीर्तितः ॥ १९ ॥ आदित्यमंडलांतरस्थआदित्योसौहिरण्मयः
पुष्कराक्षोयस्यपद्मोपमितेचक्षुषीसाहि ॥ २० ॥ महानृग्वेदरूपेणस्वनोयस्यमहास्वनः
जन्मनाशेनविक्षितेऽनादिनिधनस्ततः ॥ २१ ॥ अनंतादिस्वरूपेणधाताविश्वस्यधारणात्
यःकर्ताकर्मफलयोर्विधातायंततःस्मृतः ॥ २२ ॥ पृथिव्यादिभ्योयदुत्कृष्टोधातुरुत्तमइत्यतः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

प्रत्यक्षादेर्नगम्यो यः सोप्रमेय इति स्मृतः ॥२३॥ हृषीकाणीन्द्रियाणि हृषीकेशस्तदीश्वरः
स पद्मनाभो यन्नाभौ जगत्कारणमंबुजं ॥ २४॥ नियंतृत्वेन देवानाममरेश्वरः सोमरप्रभुः ॥ वि
(3) श्वं विचित्रं कर्मास्य विश्वकर्मा ततः स्मृतः ॥२५॥ नान्योस्ति मंतेति श्रुतेर्मननान्मनुरुच्यते
त्वष्टा स उच्यते भूतानां तनूकरणात् क्षये ॥२६॥ स्थविष्ठः स विराड्रूपत्वात्स्थूलोतिशयेन यः
पुराणत्वाद्ध्रुवश्च स्थविरो ध्रुव उच्यते ॥२७॥ सर्वेंद्रियैर्न ग्राह्यो यः सोग्राह्य इति कथ्यते ॥
शाश्वतः सर्वेषु कालेषु भवनाच्छाश्वतः स्मृतः ॥२८॥ सच्चात्मसुखैकरूपत्वात्कृष्ण इत्यभिधीयते ॥
लोहितान्यक्षिणी यस्य लोहिताक्षो बुधैः स्मृतः ॥२९॥ प्रलये सर्वभूतानां हननात्स प्रतर्दनः २
स प्रभूतो यः संपन्नो ज्ञानैश्वर्यादिभिर्गुणैः ॥३०॥ धाम मूर्त्रयाणां लोकानां त्रिककुब्धाम ईरितः
यदेनसः पुनीतेहि पवित्रं तदुदाहृतं ॥ ३१॥ यः सर्वोत्कृष्टकल्याणं परं मंगलमीरितं ॥
सर्वभूतानियंतृत्वादीशानो यस्मतो बुधैः ॥३२॥ प्राणदः प्राणदाता स कोह्येवान्यादिति श्रुतेः ॥
प्राणिनां जीवनं येन स प्राणः परमेश्वरः ॥३३॥ अतिवृद्धतया वेदे ज्येष्ठ इत्यभिधीयते ॥

अत्यंतंयः प्रशास्तास्यात्सर्वेभ्यः श्रेष्ठ इत्यतः ॥३४॥ प्रजानांपालकत्वाद्य ईश्वरः सप्रजापतिः ॥
हिरण्यगर्भोभूतेभ्यः पूर्वंयः समवर्त्तित ॥ ३५॥ धरणीयस्यगर्भोवागर्भस्त्रिगर्भ इरितः ॥ मनना
(3A) द्ध्यानयोगात्त्वेमाधवोयं स्मृतो बुधैः ॥ ३६॥ मधुर्दैत्यस्सदितवान्हतवान्मधुसूदनः ॥
चराचराणांयाशक्तिर्यदधीनास ईश्वरः ॥३७॥ यच्छौर्यंलोकविख्यातंविक्रमीतिततस्मृतः ॥
धन्वीधनुर्मुख्यतयायस्य हस्ते विराजते ॥ ३८॥ ग्रंथार्थधारणंमेधामेधावीतुतयायुतः ॥ विःप
क्षिराजोगरुडः क्रमणात्तेनविक्रमः ॥ ३९॥ क्रमणात्क्रमहेतुत्वात्क्रमः क्रांतेरितिस्मृतः
यस्मान्नविद्यतेलोकउत्तमः स्यादनुत्तमः ॥४०॥ दुराधर्षोधर्षयितुं दैत्याद्यैर्योनशक्यते ॥ कृ
तज्ञः पुण्यपापादिकृतंजानाति तत्त्वतः ॥४१॥ कृतिः स्यात्पौरुषोयत्नः सोस्यासोकृतिरीरितः
यः स्थितः स्वमहिम्नि कीर्तितस्तेनआत्मवान् ॥४२॥ ईशः सुराणांदेवानां सुरेशोयंनिगद्यते ॥ आर्ती
नामार्तिहरणात्शरणंपरिकीर्तितः ॥ ४३॥ सर्वदा परमानंदरूपत्वाच्छर्मकीर्त्यते ॥ वि
श्वस्यजननंयस्माद्विश्वरेतास्ततस्मृतः ॥ ४४॥ सर्वाः प्रजायत्सकाशात्प्रादुर्भवंतिप्रजाभवः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

स्वप्रकाशात्तथाभातिश्चंद्रांशुर्नदहरस्मृतः ॥ ४५ ॥ कालात्मनास्थितोविष्णुः संवत्सरउदाहृतः ॥
यः सर्पवद्दूरात्धर्षोभ्यालोयंयोगिमानवैः ॥ ४६ ॥ जतीतिःप्रत्ययःप्रज्ञानमानंदमितिश्रुते ॥ सर्वा
प्यात्मतयापश्यन्नेत्रवत्सर्वदर्शनः ॥ ४७ ॥ नजायतेनजातोवानजनिष्यतइत्यजः ॥ इंद्रादी
(५) नामीश्वरोयं ततः सर्वेश्वरः स्मृतः ॥ ४८ ॥ नित्यनिष्पन्नरूपत्वात्सिद्धइत्यभिधीयते
सर्ववस्तुषुसंविद्रूपत्वात्सिद्धिरितिस्मृतः ॥ ४९ ॥ यः सर्वेषांकारणत्वादादिःसर्वादिरुच्यते ॥ यः
स्वरूपान्नच्यवते कदाचिदपिसोच्युतः ॥ ५० ॥ १०० ॥ प्रथमंशतकंनाम्नाविरक्तं नामभाषतः ॥ अ
नेनप्रीयतांदेवोभगवान्रुक्मिणीपतिः ॥ ० ॥ वृषाधर्मः कपिः क्रोडः सोयमुक्तोवृषाकपिः ॥ नश
क्योयःपरिच्छेत्तुमप्रमेयात्मासउच्यते ॥ १ ॥ सर्वसंबंधरहितः सर्वयोगाविनिस्सृतः ॥ वसंति 4
सर्वभूतानियत्रतेष्वप्ययोवसुः ॥ २ ॥ वसुप्रशस्तंयश्चित्तमुक्तोवसुमनास्मृतः ॥ सत्यः
सत्यस्वरूपत्वात्सत्यज्ञानमितिश्रुतेः ॥ ३ ॥ समात्मात्वसमंयस्यरागद्वेषाद्यदूषितं ॥ सर्वै
रप्यैश्वर्यज्ञातैर्यःपरिच्छिन्नःससंमितः ॥ ४ ॥ सदाविकाररहितोमायुतोवामतःसमः ॥ अमोघः

सत्यसंकल्पात्सफलस्मृतितोपिवा ॥ ५ ॥ हृत्पुंडरीकंव्याप्नोति पुंडरीकाक्षईरितः ॥ धर्मरूपंयस्यकर्म
वृषकर्मा ततः स्मृतः ॥ ६ ॥ धर्मसंस्थापनार्थायियस्यमूर्त्तिर्वृषाकृतिः ॥ रुद्रः स्मरणमात्रेण दुः
(5A) खंदूरीकरोत्यतः ॥ ७ ॥ बहूनि मस्तकान्यस्य ततो बहुशिरास्मृतः ॥ लोकत्रयींयो बिभर्त्ति ततो बभ्रुः प्र
कीर्त्तितः ॥ ८ ॥ विश्वस्ययोनिर्हेतुत्वाद्विश्वयोनिरुदाहृतः ॥ शुचीनियस्यनामानिश्रोतव्यानिशुचि
श्रवाः ॥ ९ ॥ अमृतोनमृतिर्यस्याजरोमरइतिश्रुतेः ॥ नित्यत्वादचलत्वाच्चशाश्वतःस्थाणुरुच्यते ॥
१० ॥ यस्मिन्नारोहणंश्रेष्ठं वरारोहः सईरितः ॥ महत्तापरैश्वर्यंवायस्यासौमहातपाः ॥ ११ ॥ व्यापि
त्वात्कारणत्वेन सर्वंगच्छति सर्वगः ॥ सर्ववेत्तितथायाति सर्वविद्भानुरीरितः ॥ १२ ॥ विष्वक्सेनोयद्युधो
गशत्रुसेनापलायते ॥ जनैर्मोक्षादिलाभार्थंप्रार्थ्यतेसजनार्दनः ॥ १३ ॥ यःस्वरूपंज्ञापयतिसवैवेदः
प्रकीर्त्तितः ॥ वेदार्थंवेत्तिसंपूर्णं ततोयं वेदवित्स्मृतः ॥ १४ ॥ ज्ञानाद्यैःपरिपूर्णत्वादव्यंगो व्यक्तितोथ
वा ॥ [illegible] ॥ अंगभूतायस्यवेदावेदांगस्तततःस्मृतः ॥ १५ ॥ वेदान्विचारयतियो वेदवित्कथितोहिसः
नान्योइष्टेति वचनात्क्रांतदर्शीककविस्मृतः ॥ १६ ॥ इष्टायंसर्वलोकानांलोकाध्यक्षः प्रकीर्त्तितः ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्कराणामप्ययंनेतास्कराध्यक्षस्ततोहिसः ॥१७॥ धर्मादीनीक्षतेसाक्षात् धर्माध्यक्षःफलप्रदः ॥
कार्यकारणरूपाभ्यांकृताकृतइतिस्मृतः ॥१८॥ चतुरात्माचतस्रोस्यब्रह्माद्याहिविभूतयः ॥
(5) चतुर्व्यूहश्चतुर्धायोवासुदेवादिमूर्तिभिः ॥१९॥ चतुर्दंष्ट्रश्चतस्रोस्यदंष्ट्रान्हरिरूपवान् ॥ चतु
र्भुजःसचत्वारोबाहवोयस्यकीर्त्तितः ॥२०॥ भ्राजिष्णुः स्वप्रकाशत्वात् भ्राजतेसर्वजंतुषु ॥ भोज्यरू
पत्वात्प्रकृतिर्मायाभोजनमुच्यते ॥२१॥ कैते पुरुषरूपेणभोक्ताप्रकृतिसेवनात् ॥ सहिष्णुर्योहिस
हितोहिरण्याक्षादिकान्नरान् ॥२२॥ हिरण्यगर्भरूपेणादौसवन्जगदादिजः ॥ अनघोदुःखसंबंधः
पापवास्यनविद्यते ॥२३॥ ज्ञानादिभिर्विजयतेसर्वान्सविजयःस्मृतः ॥ यतोतिशेतेसर्वस्मात्त ५
तोजेतास्वभावतः ॥२४॥ विश्वयोनिर्विश्वरूपमुपादानाख्यकारणं ॥ पुनःपुनःशरीरेषुवस
तीतिपुनर्वसुः ॥२५॥ उपेंद्रोयानुजंत्वेनमरुत्वंतमुपाश्रितः ॥ वैरोचनिंयाचितवान्बटुरू
पेणवामनः ॥२६॥ प्रांशुरत्युन्नतोजातःक्रममाणोजगत्त्रयं ॥ नमोघंचेष्टितंयस्यासावमोघः
प्रकीर्त्तितः ॥२७॥ पावतत्वादर्चयतांशृण्वतांस्मरतांशुचिः ॥ बलप्रकर्षशालित्वात् ऊर्जितः

सगलंस्मृतः ॥१८॥ अतींद्रोतीत्यस्तिविंद्रं ज्ञानैश्वर्यादिभिःस्थितः ॥ सर्वेषांसम्यक्संग्रहणात्स्वी
(5A) कारात्संग्रहःस्मृतः ॥१९॥ सृज्यरूपतयासर्गहेतुत्वात्सर्गईरितः ॥ जन्मनाशादिराहित्यात्धृ
तात्मात्वेकरूपतः ॥२०॥ नियमोयंयमयतिस्वस्वकर्मणियःप्रजाः ॥ अंतर्यामितयासर्वजगतामुच्यते
यमः ॥२१॥ निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यउच्यते ॥ सर्वविद्यावेदितृत्वाद्वैद्योजगतिकथ्यते
॥२२॥ सदाविर्भूतरूपत्वात्सदायोगीतिगीयते ॥ धर्मत्राणायदैतेयान्हत्यतोवीरहास्मृतः ॥२३
माशब्देनोच्यतेविद्यातत्धवत्वात्माधवः ॥ मधुवत्परमप्रीतिजनकोमधुरुच्यते ॥२४॥ यइं
द्रियाण्यतिक्रांतोविषयत्वादतींद्रियः ॥ मायाविनामोहकत्वान्महामायःपरेश्वरः ॥२५॥ महोत्सा मा
होयउद्युक्तोजगज्जन्मादिकर्मसु ॥ महाबलो[illegible]बलिनांबलरूपतयामतः ॥२६॥ महाबुद्धिर्बु
द्धिमत्वाद्गुरोबुद्धिमतामपि ॥ महावीर्योहियद्वीर्यंमहत्तत्वस्यकारणं ॥२७॥ यस्यास्तीमह
तीशक्तिर्महाशक्तिःसउच्यते ॥ ज्योतिषांभासकंतेजोयस्यासौस्यान्महद्युतिः ॥२८॥ वपुर्नश
क्यनिर्देशमनिर्देश्यवपुस्ततः ॥ ऐश्वर्यलक्षणासर्वाश्रीमान्श्रीर्यस्यविद्यते ॥२९॥ अमेयात्मा

यस्यबुद्धिरमेयासर्वज्ञंतुभिः॥गोवर्धनंमंदरंचधृतवान्समहाद्रिधृक्॥४०॥महानेतादि
षुश्लेषामहेष्वासोभवेत्ततः॥महीभर्ताबभारेमांमहीमेकार्णवप्लुतां॥४१॥श्रीनिवासोयदु
(6) रसिश्रीर्वसत्यनपायिनी॥पुरुषार्थप्राप्तिहेतुःसाधूनांससतांगतिः॥४२॥अनिरुद्धोनके
नापिप्रादुर्भावेषुसंवृतः॥सुरानंदःसुरानंदयतियद्विषतांवधात्॥४३॥गोविंदोधरणीश
त्वाद्वाणीशत्वाच्चकीर्त्यते॥गोपतीनांनृपाणांचपतित्वाद्गोविदांपतिः॥४४॥तेजस्वित्वान्म
रीचिःस्यात्सर्वतेजस्विनामपि॥प्रजादमयितुंशीलंयस्येतिदमनःस्मृतः॥४५॥हंतिगच्छति
सर्वत्रहंसोहंसइतिस्मृतेः॥सुपर्णोरम्यपत्रोद्वासुपर्णेतिस्मृतेः॥४६॥शेषवासुकि ६
रूपत्वात्कथितोभुजगोत्तमः॥हिरण्यनाभःकल्याणीनाभिरस्यहिरण्यवत्॥४७॥सु
नारायणरूपेणसुतपाःसुतपश्चरन्॥पद्मनाभःपद्म[illegible]मिववर्तुलानाभिरस्यसः॥४८
प्रजापतिःपालनत्वात्प्रजानांपितृरूपतः॥अमृत्युःसनाशहेतुर्मृत्युर्यस्यनविद्यते॥४९

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

जंतोः कृत्वा कृतं सर्वं यः पश्यति स सर्वदृक् ॥ सिंहो हिनस्ति पापानि मृगेंद्रो वा निगद्यते ॥ ५०
१०० ॥ २०० ॥ द्वितीयं शतकं नाम्नां विवृतं नामभाष्यतः ॥ अनेन प्रीयतां देवो भगवान्कमलापतिः
(6A) ॥ संधाता यः कर्मफलैः संधत्ते पुरुषांस्ततः ॥ फलभोक्ता स एवेति सर्वसख्येन संधिमान् ॥ १ ॥
बुधैः सदैकरूपत्वात् स्थिरोऽयं परिकीर्तितः ॥ अजो गच्छति सर्वत्र सर्वान्क्षिपति वा ततः ॥ २
दुर्मर्षणो दानवाद्यैर्मर्षितुं यो न शक्यते ॥ शास्ता श्रुत्यादिभिर्यो हि सर्वेषामनुशासकः ॥ ३
विश्रुतात्मा सवेदादिः कृतसत्यादिरूपवान् ॥ दैत्यादीनां सुरारीणां निहंतृत्वात्सुरारिहा ॥ ४ ॥
विद्यानामुपदेष्टृत्वाज्जनकत्वात्तथा गुरुः ॥ ब्रह्मादीनां ब्रह्मविद्यादाता गुरुतमो मतः ॥ ५ ॥
लोकास्पदं वा परमं ज्योतिर्वा धाम कीर्तितः ॥ सत्यं वाक्धर्मरूपत्वात्सत्यो वा परमार्थसत् ॥ ६
पराक्रमो ह्यवितथो यस्य सत्यपराक्रमः ॥ निमीलिते यस्य नेत्रे निमिषो योगनिद्रितः ॥ ७ ॥ नित्य
प्रबुद्धरूपत्वादुक्तो ह्यनिमिषोऽन्वसः ॥ स्रग्वी बिभ्रद्वैजयंतीं पंचवर्णमणिस्रजं ॥ ८ ॥ उदा
रधीर्वाचस्पतिर्महाधीर्वोक्ष्यातित्वतः ॥ पदं प्रकृष्टं नयति मुमुक्षून्नयणीस्ततः ॥ ९ ॥ अस्य ग्रामस्य

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

वि॰स॰

सर्वस्यनेतृत्वाद्ग्रामणीस्मृतः ॥ श्रीमान्लोकेधिकायस्यशोभासर्वातिशायिनी ॥ १०॥ न्यायो
भेदकरस्तर्कैः प्रमाणानुग्रहैककृत् ॥ नीधातोस्त्विनेतास्याज्जगद्यंत्रप्रवाहकः ॥ ११॥ भूतानि
(८) प्राणरूपेणयोन्वेष्येत्ससमीरणः ॥ सहस्रमूर्धाशीर्षाणिसहस्राण्यस्यसस्मृतः ॥ १२॥ आत्मा
विश्वस्यजगतोविश्वात्मापरिकीर्तितः ॥ नेत्राण्यस्यसहस्राणिसहस्राक्षस्ततस्मृतः ॥ १३॥
पादासहस्राण्यस्येतिततउक्तःसहस्रपात् ॥ आवर्तनःश्रीत्वमस्युसंसारपरिवर्तितुं ॥ १४॥ निव
त्तात्मानिवृत्तोस्यस्यात्मासंसारबंधनात् ॥ अविद्ययाछादिकयासंवृत्वात्विसंवृतः ॥ १५॥ जगत्प्र त
तर्दयतियःमल्लयेसंप्रमर्दनः ॥ अहःसंवर्तकोभानुःसम्यगन्हाप्रवर्तनात् ॥ १६॥ यजमानार्पित ७
हविर्वहनाद्वह्निरुच्यते ॥ अनिलोत्राननाद्धानानास्तियस्यालयःक्वचित् ॥ १७॥ अनंतादिस्व
रूपेणभूधरोधरणीधरः ॥ सुप्रसादोमोक्षदानादपकारवतामपि ॥ १८॥ प्रसन्नात्माप्तकामत्वा
द्वादयाल्वुःस्वभावतः ॥ विश्वंधृष्णातिप्रागल्भ्येनयतोविश्वधृक्ततः ॥ १९॥ विश्वभुक्विश्वसं
हर्ताधिशास्याद्विश्वपालकः ॥ विभुर्हिरण्यगर्भादिरूपेणविविधंभवान् ॥ २०॥ अत्मादिनस्यः

सत्करोतिसत्कर्त्तायंवतः स्मृतः ॥ ब्रह्मादिभिः पूजितोतः सत्कृतः परिकीर्तितः ॥ २१ ॥ साधुर्न्या
यप्रवृत्तोवासाध्यमात्रप्रसाधकः ॥ जन्तुर्जहात्यविदुषोभ । कात्रयतिवापरं ॥ २२ ॥ नाराणामयनं
(७७) यस्मात्तस्मान्नारायणः स्मृतः ॥ नयतीतिनरः प्रोक्तः परमात्मासनातनः ॥ २३ ॥ असंख्येयोयस्य
संख्याहेतुर्भेदोनविद्यते ॥ सभवेदप्रमेयात्मायद्रूपंनप्रमीयते ॥ २४ ॥ सविशिष्टोयोतिशेतेस
र्वान्स्थावरजंगमान् ॥ शिष्टकृच्छासनंकरोयथवास्यो शिष्टपालकः ॥ २५ ॥ शुचिर्नोकिल्बिषंयस्य
निरंजनइतिश्रुतेः ॥ सिद्धार्थः पूर्णकामत्वात्सत्यकामइतिश्रुतेः ॥ २६ ॥ निष्पन्नोयस्यसंकल्पः
सिद्धसंकल्पइरितः ॥ ससिद्धिदः पुण्यफलंकर्तृभ्यः प्रददातियः ॥ २७ ॥ परसिद्धेः साधकत्वा
दुच्यतेसिद्धिसाधनः ॥ पुण्याहद्वादशादिनंवृषाहोतद्युतोभवेत् ॥ २८ ॥ योवर्षत्येवभक्तेभ्यः
कामान्सवृषभस्मृतः ॥ त्रैलोक्यैकक्रमणाद्धिहृदु विन्विक्रमइतिश्रुतेः ॥ २९ ॥ धामारुरुक्षोः सोपानं
वृषपर्वाततस्मृतः ॥ यस्योदरंवर्षतीवप्रजाः सहिवृषोदरः ॥ ३० ॥ प्रजायोब्रह्मरूपेणवर्द्धं
यत्सहिवर्द्धनः ॥ वर्धतीविश्वरूपेणवर्धमानः सउच्यते ॥ ३१ ॥ विविक्तः सोवर्द्धं

मानोपिपृथक्योवतिष्ठते ॥श्रुतयोहिनिधीयंतेयत्रासौश्रुतिसागरः ॥३२॥ सुभुजः शोभ
नायस्यजगद्रक्षाकराभुजाः॥ नशक्यतेधारयितुं केनापिहिसदुर्धरः ॥३३॥ यस्माद्वाक्नि
सृताब्रह्ममयीवाग्मीततःस्मृतः॥ ईश्वराणामीश्वरत्वान्महेंद्रोइतिकथ्यते ॥३४॥ कुबेरेंद्रस्व
(8) रूपेणवसुदोयंधनान्वदः॥ वस्तेयआछादयतिस्वरूपंमाययावसुः॥३५॥ नैकरूपोयस्यरूप
मेकनपुरुरूपतः॥ बृहद्रूपवराहाख्योयस्यरूपंततःस्मृतः॥३६॥ शिपिविष्टोरश्मिषुयोथवा
पशुषुतिष्ठति॥जगत्प्रकाशकंशीलंयस्येतिस्यात्प्रकाशनः॥३७॥ ओजस्तेजोद्युतिधरः प्राणशौ
र्यप्रभाधरः॥यःस्वलक्षणआत्मास्यात्प्रकाशात्मासउच्यते॥३८॥ सूर्यादिरूपैर्विश्वंतापयतीति ८
प्रतापनः॥योधर्मज्ञानवैराग्यादिभिर्युक्तःऋद्धउच्यते॥३९॥ स्पष्टाक्षरःस्यादोंकारलक्षणंयस्य
चाक्षरं॥मंत्रेणबोध्योमंत्रंवाऋग्यजुःसामलक्षणः॥४०॥ चंद्रांशुःस्तातितायेनतप्तानांस्करवका
रकः॥भास्करद्युतिसाधर्म्यात्भास्करद्युतिरुच्यते॥४१॥ अमृतांशूद्भवोयस्मात्हिमांशोरुद्भ
वोहिसः॥ लोकेभातीतिभानुस्तामेवभांतमितिश्रुतेः ४२॥ शशबिंदुश्चंद्रइवप्रजाःपुष्णाति

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai joint project

नित्यशः॥स्फुराणांशुभदातॄणांचेश्वरोयंस्फुरेश्वरः॥४३॥संसाररोगभैषज्यंभक्तानामौष
धंततः॥जगदुद्धारहेतुत्वाज्जगतःसेतुरुच्यते॥४४॥सत्योधर्मोबलंचास्यसत्यधर्मपरा
क्रमः॥भूतभव्यभवन्नाथोभूतग्रामेश्वरःपरः॥४५॥पवनःपवतामस्मीतिवाक्यात्पवनःस्मृ
(8A) तः॥पावनःपावयतीतिभीषास्मादितिसद्गुते॥४६॥अन्नान्प्राणानात्मतयालातिजीवोनैःस्मृ ले
तः॥कामान्हंतिमुमुक्षूणांतत्तोयंकामहास्मृतः॥४७॥जनकत्वेनकामस्यप्रद्युम्नस्यहिकामकृ
त्॥मनोहारत्वादत्यंतंसर्वस्मात्कांतउच्यते॥४८॥कामोयमेवसर्वेभ्यःकाम्यतेमोक्षकांक्षिभिः
कामप्रदोभक्तकर्मान्प्रकर्षेणददातियः॥४९॥शक्रादिसुरपालेभ्यःप्रकृष्टभवनात्प्रभुः॥
कृतादिनाहिकालस्यभेदकर्तायुगादिकृत्॥५०॥१५०॥२००॥तृतीयशतकंनाम्नांविवृत्तं
नामभाष्यतः॥अनेनप्रीयतांदेवोभगवानिंदिरापतिः॥१॥युगान्यावर्त्तयतियोयुगावर्त्तः
स्मृतस्ततः॥नैकमायःसविज्ञेयोयस्मिन्मायाःसहस्रशः॥१॥कल्पांतेसर्वग्रसनादुच्यते
समहाशनः॥ज्ञानेंद्रियाणांसर्वेषामगम्योदृश्यउच्यते॥२॥व्यक्तरूपःस्थूलरूपतयादृश्यं

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वि॰स॰

हियइपुः ॥ सहस्राणि स्फुरारीणां जयतीति सहस्रजित् ॥३॥ सर्वाण्यचिंत्यशक्तित्वाज्जयतीति
अनंतजित् ॥ इष्टः परानंदरूपत्वाद्वा यज्ञेन पूजितः ॥४॥ सविशिष्टोयं सर्वांतर्यामित्वेन विशि
(९१) ष्यते ॥ शिष्टेष्टोत्र बहुव्रीहिर्वा तत्पुरुष इतीतः ॥५॥ शशी खंडी शिखंडोस्य कलापोलंकृतिः स्मृ
तः ॥ सर्वान्नघंति बध्नाति मायया नहुषस्ततः ॥६॥ कामानां वर्षणात्सर्वभूतानां वृष उच्यते ॥
क्रोधहंतीति साधूनां क्रोधहा परिकीर्तितः ॥७॥ उच्यते क्रोधकृत्कर्ता स्फुरारीणां विनाशकृत् ॥
विश्वबाहुर्यस्य विश्वं विश्वतो वापि बाहवः ॥[illegible]॥ जगद्धात्रीं यो धरति प्रजां वा स महीधरः ॥ षड् ९
र्भिर्भिर्विनारूपं यस्याः सा वच्युतः स्मृतः ॥ ॥ प्रथितः सोयो विख्यातो विश्वोत्पत्यादिकर्मभिः
प्राणः सञ्चालनः सर्वाः प्रजाः प्राणयतीति यः ॥१०॥ प्राणान्ददाति देवेभ्यः प्राणदो ह्यतिवाति
णां ॥ आदित्यां कश्यपाज्जातस्ततोयं वासवानुजः ॥११॥ आपो यत्र निधीयंते पां निधिः साग
रो यथा ॥ यं भूतान्यधितिष्ठंति तदधिष्ठानमुच्यते ॥१२॥ सोप्रमत्तोधिकारिभ्यः फलयच्छ
न्नमुह्यति ॥ स्वे महिम्नि स्थितो नित्यं ततउक्तः प्रतिष्ठितः ॥१३॥ सस्कंदो वायुरूपेण विशे

षयतियप्रजाः॥स्कंदधर्मपथंधारयतिस्कंदधरस्ततः॥१४॥धुर्योधुरंवहतियोभूतजन्मादिल
क्षणं॥वरदोयंगोप्रदातायजमानःस्वरूपतः॥१५॥वहत्यसौसत्यवाहादीन्वायून्वायुवाहनः॥
अछादकत्वात्स्तत्यत्वाद्वासुदेवःप्रकीर्तितः॥१६॥सूर्यचंद्राग्निरूपत्वात्बृहद्भानुर्निगद्यते॥आ
(9A) दिदेवःसजगतोयःसर्वस्यादिकारणं॥१७॥पुरंदरःसशत्रूणांपुराणांदारणात्स्मृतः॥अशोकश्शोक
मोहाद्यानोयस्याहिषडूर्मयः॥१८॥संसारसागराद्भक्तान्यस्तारयतितारणः॥सतारस्तारयति
योगर्भजन्मादिकाद्भयात्॥१९॥सशूरोविक्रमस्त्वनदैत्यादिभ्योतिरिच्यते॥वासुदेवस्वरूपेण
शौरिःशूरकुलोद्भवः॥२०॥जनेश्वरोजनानांहिजंतूनामीश्वरस्ततः॥अनुकूलःसुखकरःसर्वे
षामात्मवत्तयः॥२१॥असंख्येयावतारत्वात्छतावर्तःप्रकीर्तितः॥पद्मंहस्तेवर्ततेस्यसपद्मी
त्युच्यतेबुधैः॥२२॥यन्नेत्रपद्मसदृशेततःपद्मनिभेक्षणः॥पद्मनाभःपद्ममध्यकर्णिकायांहियः
स्थितः॥२३॥पंकजोपमनेत्रत्वादरविंदाक्षउच्यते॥पद्मगर्भउपास्योयोहृत्सरोरुहकुड्मले॥२४
स्वमाययाशरीराणिबिभर्त्तिशरीरभृत्॥महर्धिर्महतीऋद्धिर्विभूतिर्यस्यसस्मृतः॥२५॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com